# ।। सरस्वतीस्तोत्रम् ।।

बृहस्पतिरुवाच ।।

सरस्वति नमस्यामि चेतनां हृदि संस्थिताम् ।
कण्ठस्थां पद्मयोनिं त्वं ह्रीङ्कारां सुप्रियां सदा ।।१।।
मतिदां वरदां चैव सर्वकामफलप्रदाम् ।
केशवस्य प्रियां देवीं वीणाहस्तां वरप्रदाम् ।।२।।
मन्त्रप्रियां सदा हृद्यां कुमतिध्वंसकारिणीम् ।
स्वप्रकाशां निरालम्बामज्ञानतिमिरापहाम् ।।३।।
मोक्षप्रियां शुभां नित्यां सुभगां शोभनप्रियाम् ।
पद्मोपविष्टां कुण्डलिनीं शुक्लवस्त्रां मनोहराम् ।।४।।
आदित्यमण्डले लीनां प्रणमामि जनप्रियाम् ।
ज्ञानाकारां जगद्दीपां भक्तविघ्नविनाशिनीम् ।।५।।
इति सत्यं स्तुता देवी वागीशेन महात्मना ।
आत्मानं दर्शयामास शरदिन्दुसमप्रभाम् ।।६।।

श्रीसरस्वत्युवाच ।।

वरं वृणीष्व भद्रं त्वं यत्ते मनसि वर्तते ।

बृहस्पतिरुवाच ।।

प्रसन्ना यदि मे देवि परं ज्ञानं प्रयच्छ मे ।।७।।

श्रीसरस्वत्युवाच ।।

दत्तं ते निर्मलं ज्ञानं कुमतिध्वंसकारकम् ।
स्तोत्रेणानेन मां भक्त्या ये स्तुवन्ति सदा नराः ।।८।।
लभन्ते परमं ज्ञानं मम तुल्यपराक्रमाः ।
कवित्वं मत्प्रसादेन प्राप्नुवन्ति मनोगतम् ।।९।।
त्रिसन्ध्यं प्रयतो भूत्वा यस्त्विमं पठते नरः ।
तस्य कण्ठे सदा वासं करिष्यामि न संशयः ।।१०।।

इति श्रीरुद्रयामले श्रीबृहस्पतिविरचितं सरस्वतीस्तोत्रं सम्पूर्णम्